सप्तमः पाठः

# नीतिश्लोकाः

(अयं पाठः सुप्रसिद्धस्य ग्रन्थस्य महाभारतस्य उद्योगपर्वणः अंशविशेष (अध्यायाः 33-40) रूपायाः विदुरनीतेः संकलितः। युद्धम् आसन्नं प्राप्य धृतराष्ट्रो मन्त्रिप्रवरं विदुरं स्वचित्तस्य शान्तये कांश्चित् प्रश्नान् नीतिविषयकान् पृच्छति। तेषां समुचितमुत्तरं विदुरो ददाति। तदेव प्रश्नोत्तररूपं ग्रन्थरत्नं विदुरनीतिः। इयमपि भगवद्गीतेव महाभारतस्याङ्गमपि स्वतन्त्रग्रन्थरूपा वर्तते।)

यस्य कृत्यं न विघ्नन्ति शीतमुष्णं भयं रतिः ।
समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते ॥1॥

तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम् ।
उपायज्ञो मनुष्याणां नरः पण्डित उच्यते ॥2॥

अनाहूतः प्रविशति अपृष्टो बहुभाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥3॥

एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा ।
विद्यैका परमा तृप्तिः अहिंसैका सुखावहा ॥4॥

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत् ॥5॥

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥6॥

सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते ॥7॥

सुलभाः पुरुषा राजन् सततं प्रियवादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥8॥

पूजनीया महाभागाः पुण्याश्च गृहदीप्तयः ।
स्त्रियः श्रियो गृहस्योक्तास्तस्माद्रक्ष्या विशेषतः ॥9॥

अकीर्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः ।
हन्ति नित्यं क्षमा क्रोधमाचारो हन्त्यलक्षणम् ॥10॥

## अन्वयाः

यस्य कृत्यं शीतम्, उष्णं, भयं, रतिः, समृद्धि, असमृद्धिः वा (च) न विघ्नन्ति सः वै पण्डित उच्यते ॥1॥

सर्वभूतानां तत्त्वज्ञः सर्वकर्मणां योगज्ञः मनुष्याणाम् (च) उपायज्ञः नरः पण्डितः उच्यते ॥2॥

मूढचेता नराधमः अनाहूतः प्रविशति, अपृष्टः (अपि) बहु भाषते, अविश्वस्ते (च) विश्वसिति ॥3॥

एकः (एव) धर्मः परं श्रेयः, एका (एव) क्षमा उत्तमा शान्तिः, एका विद्या परमा तृप्तिः, एका अहिंसा (च) (परमा) सुखावहा (भवति) ॥4॥

नरकस्य इदम् त्रिविधं द्वारं कामः, क्रोधः तथा लोभः (चेति)। तस्मात् आत्मनः नाशनम् एतत् त्रयं त्यजेत् ॥5॥

भूतिम् इच्छता पुरुषेण इह निद्रा, तन्द्रा, भयं, क्रोधः, आलस्यं, दीर्घसूत्रता (च) षड् दोषाः हातव्याः ॥6॥

धर्मः सत्येन रक्ष्यते, विद्या योगेन रक्ष्यते, रूपं मृजया रक्ष्यते, कुलं (च) वृत्तेन रक्ष्यते ॥7॥

हे राजन् ! सततं प्रियवादिनः पुरुषाः सुलभाः (सन्ति) तु अप्रियस्य पथ्यस्य वक्ता श्रोता च दुर्लभः (अस्ति) ॥8॥

गृहस्य श्रियः, गृहदीप्तयः पुण्याः महाभागाश्च स्त्रियः पूजनीयाः उक्ताः (सन्ति)। तस्मात् (एताः) विशेषतः रक्ष्याः (भवन्ति) ॥9॥

विनयः अकीर्तिं हन्ति, पराक्रमः अनर्थं हन्ति, क्षमा नित्यं क्रोधं हन्ति, आचारः (च) अलक्षणं हन्ति ॥10॥

## शब्दार्थाः

| | | |
|---|---|---|
| रतिः | – आनन्दः | – भावुकता |
| तत्वज्ञः | – रहस्यज्ञः | – रहस्य को जाननेवाला |
| योगज्ञः | – कौशलं जानाति | – कौशल जाननेवाला |
| उच्यते | – कथ्यते | – कहा जाता है |
| उपायज्ञो | – उपायं जानाति | – उपाय को जाननेवाला |
| अनाहूतः | – न आहूतः | – बिना बुलाये हुए |
| अपृष्टः | – न पृष्टः | – बिना पूछे हुए |
| अविश्वस्ते | – अविश्वासयोग्ये जने | – अविश्वसनीय व्यक्ति पर |
| मूढचेता | – मूर्खः | – मूर्ख हृदय वाला |
| नराधमः | – निकृष्टः जनः | – मनुष्यों में नीच |
| सुखावहा | – सुखदा | – सुख देनेवाली |
| भूतिम् | – ऐश्वर्यम् | – ऐश्वर्य को |
| इच्छता | – वाञ्छता | – चाहते हुए |
| मृजया | – शुद्ध्या ( शृङ्गारोपचारेण) | – स्वच्छता या उबटन आदि के द्वारा |
| प्रियवादिनः | – मधुरभाषिणः | – प्रिय बोलने वाले |
| अकीर्तिम् | – अपयशः | – अपयश |
| हन्ति | – नाशयति | – नाश करता है |
| अलक्षणम् | – कुलक्षणम् | – कुलक्षण, कुरूपता |

## व्याकरणम्

### सन्धिविच्छेदः-

| | |
|---|---|
| समृद्धिरसमृद्धिर्वा | – समृद्धिः + असमृद्धिः + वा |
| विद्यैका | – विद्या + एका |
| अहिंसैका | – अहिंसा + एका |
| नरकस्येदं | – नरकस्य + इदम् |

नाशनमात्मनः — नाशनम् + आत्मनः

गृहस्योक्तास्तस्माद्रक्ष्या — गृहस्य + उक्ताः + तस्मात् + रक्ष्याः

क्रोधमाचारः — क्रोधम् + आचारः

हन्त्यलक्षणम् — हन्ति + अलक्षणम्

**प्रकृतिप्रत्ययविभागः**

निवर्त्य — नि + वृत् + ल्यप्

उपगम्य — उप + गम् + ल्यप्

वक्तव्यम् — वच् + तव्यत्

परिहृत्य — परि + हृ + ल्यप्

साध्यः — साध् + ण्यत्

गृहीत्वा — ग्रह् + क्त्वा

जित्वा — जि + क्त्वा

भेतव्यम् — भी + तव्यत्

भेद्यम् — भिद् + ण्यत्

दातव्यम् — दा + तव्यत्

जनितम् — जन् + क्त

आचारः — आङ् + चर् + घञ्

लोभः — लुभ् + घञ्

## अभ्यासः

### (मौखिकः)

1. **एकपदेन उत्तरं वदत –**

(क) विदुरः कः आसीत् ?

(ख) मूढचेता नराधमः कस्मिन् विश्वसिति ?

(ग) उत्तमा शान्तिः का ?

(घ) का परमा तृप्तिः ?

(ङ) नरकस्य कियद् द्वारं परिगणितम् ?

(च) विद्या केन रक्ष्यते ?

(छ) विनयः कं हन्ति ?

2. **श्लोकांशं योजयित्वा वदत-**

(क) त्रिविधं नरकस्येदं द्वारं ........................ ।
कामक्रोधस्तया ........................ त्रयं त्यजेत्।

(ख) सत्येन रक्ष्यते धर्मो ........................।
........................ कुलं वृत्तेन रक्ष्यते।।

## अभ्यासः

## ( लिखितः )

1. **एकपदेन उत्तरं वदत -**

(क) केषां तत्वज्ञः पण्डितः उच्यते ?

(ख) अनाहूतः कः प्रविशति ?

(ग) धर्मः केन रक्ष्यते ?

(घ) क्षमा कं हन्ति ?

(ङ) सुखावहा का ?

(च) नरकस्य त्रिविधं द्वारं कस्य नाशनम् ?

(छ) केन षड् दोषाः हातव्याः ?

2. **उदाहरणमनुसृत्य क्तिन् प्रत्यय-योगेन शब्द निर्माणं करणीयम् -**

उदाहरणम् - भू + क्तिन् = भूतिः

**प्रश्नाः-**

(क) गम् + क्तिन्
शम् + क्तिन्
तृप् + क्तिन्
रम् + क्तिन्
श्रम् + क्तिन्

सम् + ऋध् + क्तिन्

वृध् + क्तिन्

नी + क्तिन्

हन् + क्तिन्

कृ + क्तिन्

3. **उदाहरणानुसारं वाच्य-परिवर्तनं कुरुत –**

उदाहरणम् – (क) कर्तृवाच्ये – विनयः अकीर्तिं हन्ति।

कर्मवाच्ये – विनयेन अकीर्तिः हन्यते।

(ख) कर्मवाच्ये – धर्मः सत्येन रक्ष्यते।

कर्तृवाच्ये – सत्यं धर्मं रक्षति।

**प्रश्नाः**

(क) पराक्रमः अनर्थं हन्ति।

(ख) क्षमया क्रोधः हन्यते।

(ग) योगः विद्यां रक्षति।

(घ) मृजया रूपं रक्ष्यते।

(ङ) आचारेण अलक्षणः हन्यते।

(च) मया ग्रन्थः पठ्यते।

(छ) वयं वेदं पठामः।

ABDIEL SOLUTIONS ABSOL PATNA

4. **पूर्णवाक्येन उत्तरं लिखत –**

(क) पुरुषेण के षड् दोषाः हातव्याः ?

(ख) पण्डितः कः उच्यते ?

(ग) एक एव धर्मः किं कथ्यते ?

(घ) नरकस्य कानि त्रीणि द्वाराणि सन्ति ?

(ङ) कस्य कस्य च वक्ता श्रोता च दुर्लभः ?

(च) स्त्रियः गृहस्य काः उक्ताः सन्ति ?

(छ) कुलं केन रक्ष्यते ?

5. **निम्नाङ्कितपदैः एकैकं वाक्यं रचयत -**

(क) उच्यते, (ख) त्यजेत्, (ग) बहुभाषते, (घ) विश्वसिति, (ङ) वर्तते, (च) विघ्नन्ति, (छ) रक्ष्या।

## योग्यताविस्तारः

धृतराष्ट्रेण सह विदुरस्य सम्पन्नः संवादः ''विदुरनीतिः'' इति कथ्यते। अनुभवसिद्धस्य विदुरस्य एकैकं पदं नीतिसम्मतं, व्यावहारिकम् अनुकरणीयञ्चास्ति। यदा धृतराष्ट्रः विदुरम्पृच्छति हे विदुर! अस्मिन् संसारे सुखानि कानि सन्ति ? विदुरः उक्तवान् -

अर्थागमोऽनित्यमरोगिता च,
प्रिया च भार्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या
षड् जीवलोकस्य सुखानि राजन्।।

## अनुशीलनी क्रिया

(क) विदुरनीतौ व्यक्तित्वनिर्माणाय अमोघमन्त्राः दृश्यन्ते। तेषां मन्त्राणाम् अनुशीलनं करणीयम्। यथा स्व-दैनन्दिनी मध्ये आलस्यवशात् निद्रावशात्, भयवशात्, क्रोधवशात् दीर्घसूत्रतावशाच्च जायमानाः कुपरिणामाः लेखनीयाः। तदनन्तरम् आलस्यविनाशाय स्फूर्तिमन्त्रस्य, निद्रा तन्द्रा निवारणाय जागरूकतायाः, भयशमनाय साहसस्य, क्रोधविनाशाय शान्तिमन्त्रस्य च साहाय्यं स्वीकरणीयम्।

(ख) संस्कृतशिक्षकस्य सहयोगेन नीतिप्रदानां श्लोकानाम् संग्रहः कर्त्तव्यः। यथा -

(क) विक्लवा वीर्यहीनाश्च ते दैवं पर्युपासते।
वीराः सम्भावितात्मानो न दैवं समुपासते।। (वाल्मीकिः)

(ख) विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतत्
ज्ञानाय दानाय च रक्षणाय।।

□